यान्ति देवव्रता देवान्पितॄन्यान्ति पितृव्रताः ।

भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ॥ ९.२५ ॥

yānti devavratā devānpitṝnyānti pitṛvratāḥ ।
bhūtāni yānti bhūtejyā yānti madyājino'pi mām ।। 9.25।।

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।

तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ ९.२६ ॥

patraṁ puṣpaṁ phalaṁ toyaṁ yo me bhaktyā prayacchati ।
tadahaṁ bhaktyupahṛtamaśnāmi prayatātmanaḥ ।। 9.26।।

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।

यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥ ९.२७ ॥

yatkaroṣi yadaśnāsi yajjuhoṣi dadāsi yat ।
yattapasyasi kaunteya tatkuruṣva madarpaṇam ।। 9.27।।

शुभाशुभफलैरेवं मोक्श्यसे कर्मबन्धनैः ।

संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥ ९.२८ ॥

śubhāśubhaphalairevaṁ mokśyase karmabandhanaiḥ ।
sannyāsayogayuktātmā vimukto māmupaiṣyasi ।। 9.28।।

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ।

ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥ ९.२९ ॥

samo'haṁ sarvabhūteṣu na me dveṣyo'sti na priyaḥ ।
ye bhajanti tu māṁ bhaktyā mayi te teṣu cāpyaham ।। 9.29।।